# Sunagarena Shivarchane Ghritakambalarpanakathanam

# સુનાગરેણ શિવાર્ચને ઘૃતકમ્બલાર્પણકથનમ્

## Document Information

Text title : Sunagarena Shivarchane Ghritakambalarpanakathanam

File name : sunAgareNashivArchaneghRRitakambalArpaNakathanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 200-228||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# સુનાગરેણ શિવાર્ચને ઘૃતકમ્બલાર્પણકથનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
સુનાગરઃ (ઉવાચ) -
અસિતાયાઃ સિતાયાશ્ચ ધેનોર્ઘૃતમનુત્તમમ્ ।
સમ્પાદનીયં યત્નેન ઘનીભૂતં ચ શોધિતમ્ ॥ ૨૦૦॥

તદ્ઘૃતં તુલયોત્તીર્ણં પ્રસ્થં સાર્ધશતત્રયમ્ ।
તદર્ધં વા તદર્ધં વા સાયં નેયં શિવાલયે ॥ ૨૦૧॥

ઘૃતેનાન્યેન દેવેશમભિષિચ્ય મહેશ્વર ।
ઘનીભૂતં ઘૃતં દેયં તતઃ શઙ્કરમસ્તકે ॥ ૨૦૨॥

તતસ્તિલૈઃ સર્ષપૈશ્ચ બિલ્વપત્રૈશ્ચ કોમલૈઃ ।
હેમપદ્મૈશ્ચ દેવેશઃ પૂજનીયો મહેશ્વરઃ ॥ ૨૦૩॥

ધૂપદીપાદિકં દેયં તતો નૈવેદ્યમાદરાત્ ।
તતો નીરાજનં દત્વા દેયઃ પુષ્પાઞ્જલિસ્તતઃ ॥ ૨૦૪॥

પ્રદક્ષિણનમસ્કારાન્ કૃત્વા ચ તદનન્તરમ્ ।
શૈવં પઞ્ચાક્ષરં જપ્વા શિવાયૈતન્નિવેદયેત્ ॥ ૨૦૫॥

તતો જાગરણં કાર્યં શિવસ્મરણપૂર્વકમ્ ।
રાત્રિર્નેયા પ્રયત્નેન મહાદેવકથાદિભિઃ ॥ ૨૦૬॥

તતઃ પ્રાતઃ સમુત્થાય કૃત્વા સ્નાનાદિકં તતઃ ।
પૂજનીયો મહાદેવો ઘૃતસેચનપૂર્વકમ્ ॥ ૨૦૭॥

ભોજનીયાસ્તતઃ શૈવા ભક્ષ્યૈર્ભોજ્યૈશ્ચ યત્નતઃ ।
તતઃ સ્વયં ચ ભોક્તવ્યં બન્ધુભિઃ સહ સાદરમ્ ॥ ૨૦૮॥

અનેન તવ દારિદ્યં નાશમેષ્યતિ સર્વથા ।
ભોગાંશ્ચ વિપુલાન્ભુક્ત્વા શિવલોકં ગમિષ્યસિ ॥ ૨૦૯॥

ગૌતમઃ ઉવાચ
ઇત્યુક્તસ્તેન સ શિવે ચકાર ઘૃતકમ્બલમ્ ।
તતઃ પ્રાપ સ ચૈશ્વર્યમક્ષીણવૃદ્ધિસંયુતમ્ ॥ ૨૧૦॥

રત્નપ્રાસાદસંયુક્તા ગૃહાસ્તેન વિનિર્મિતાઃ ।
વેદિકાઃ કારિતાસ્તેન નવરત્નોજ્જ્વલાઃ શુભાઃ ॥ ૨૧૧॥

નિક્ષેપા બહવો લબ્ધાસ્તેનેશસ્ય પ્રસાદતઃ ।
તસ્ય સાર્ધશતં પુત્રા બભૂવુઃ શિવતત્પરાઃ ॥ ૨૧૨॥

ઇદં સર્વં સમાલોક્ય મહદૈશ્વર્યમુત્કટમ્ ।
સમસ્તભોગસમ્પન્નો હૃષ્ટચિત્તો બભૂવ સઃ ॥ ૨૧૩॥

સ માઘમાસિ યત્નેન સકુટુમ્બો મહેશ્વરમ્ ।
નિત્યં સમર્ચયામાસ સાધનૈર્વિવિધૈરપિ ॥ ૨૧૪॥

અધશ્ચકાર ધનદમૈશ્વર્યેણ સુખેન ચ ।
તેનૈશ્વર્યેણ સન્તુષ્ટો બભૂવ શિવતત્પરઃ ॥ ૨૧૫॥

પ્રતિસંવત્સરં ચાપિ માઘમાસે સ શાઙ્કરઃ ।
ચકાર પુત્રપૌત્રાદ્યૈઃ શમ્ભવે ઘૃતકમ્બલમ્ ॥ ૨૧૬॥

તતઃ પ્રવવૃધે ભૂરિ દ્રવ્યં માનાતિગં પુનઃ ।
પ્રાસાદઃ કારિતસ્તેન રત્નસ્તમ્ભવિરાજિતઃ ॥ ૨૧૭॥

તસ્મિન્ શિવાલયે તેન લિઙ્ગં રત્નમયં શુભમ્ ।
સ્થાપિતં વિધિવત્તત્ર બહુદ્રવ્યવ્યયાન્મુદા ॥ ૨૧૮॥

કૃતાનિ તેન દાનાનિ બહૂનિ શિવમન્દિરે ।
તદા સુવર્ણદાનાનિ ગોદાનાનિ ચ સાદરમ્ ॥ ૨૧૯॥

કૃતાનિ શઙ્કરપ્રીત્યૈ શાઙ્કરેભ્યો વિશેષતઃ ।
ઘૃતાક્તપરમાન્નેન સમ્પૂજ્ય પરમેશ્વરમ્ ॥ ૨૨૦॥

શર્કરામધુદુગ્ધાન્નૈઃ પૂજયામાસ શઙ્કરમ્ ।
અયુતં શિવભક્તાશ્ચ ભોજિતાઃ પ્રત્યહં મુદા ॥ ૨૨૧॥

અતિથીન્ પૂજયામાસ ભોજયામાસ ચાદરાત્ ।
કદાચિત્તદ્ગૃહં પ્રાપ્તાઃ શૈવાઃ સઙ્ખ્યાતિગાઃ નિશિ ॥ ૨૨૨॥

દૃષ્ટ્વા તાન્ ભસ્મદિગ્ધાઙ્ગાન્ હૃષ્ટચિત્તો બભૂવ સઃ ।

તતસ્તાન્ભોજયામાસ સ્વાદ્વન્નૈર્ઘૃતપાચિતૈઃ ॥ ૨૨૩॥

દદૌ સ દક્ષિણાત્વેન રત્નાનિ ચ ધનાનિ ચ ।
એવં ભુક્ત્વાऽખિલાન્ભોગાન્કૃત્વા ચ શિવપૂજનમ્ ॥ ૨૨૪॥

દેહાન્તે સ શિવં પ્રાપ ઘૃતકમ્બલસેવયા ॥ ૨૨૫॥

અગસ્ત્યઃ (ઉવાચ)
ઇત્યુક્તઃ સ સુમેધાશ્ચ ગૌતમેન મહાત્મના ।
ચકાર માઘે સમ્પ્રાપ્તે શિવાય ઘૃતકમ્બલમ્ ॥ ૨૨૬॥

ઐશ્વર્યં ચાપિ સમ્પ્રાપ સર્વં શઙ્કરપૂજયા ।
ભુક્ત્વા ચ ભોગાન્સકલાઞ્છિવસાયુજ્યમાપ ચ ॥ ૨૨૭॥

અતો યત્નેન કર્તવ્યં મહેશે ઘૃતકમ્બલમ્ ।
ભોગાન્મોક્ષેચ્છયા વિપ્ર સત્યં સત્યં ન સંશયઃ ॥ ૨૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સુનાગરેણ શિવાર્ચને ઘૃતકમ્બલાર્પણકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૨૦૦-૨૨૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 200-228..

Notes:
Sunāgara સુનાગર explains the procedure of offering Ghṛtakambalam ઘૃતકમ્બલમ્ during Māgha māsa માઘ માસ for worship of Śiva શિવ. Ṛṣi Gautama ઋષિ ગૌતમ and Ṛṣi Agastya ઋષિ અગસ્ત્ય summarize the merits of the same earned by Sunāgara સુનાગર and his lineage. Ghṛtakambalam ઘૃતકમ્બલમ્ procedure finds detailed mention in the Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ and in the Kāmika Āgama કામિક આગમ. The Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ has several other details about Śivapūjāsādhanāni શિવપૂજાસાધનાનિ.

Proofread by Ruma Dewan

*Sunagarena Shivarchane Ghritakambalarpanakathanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*